## लुटि च क्लृपः । (९३/२३५१)

[1]वृतादित्वादेव स्यसनोर्विकल्पः सिद्धो लुटि [2]विधीयते । चकारस्तर्हि स्यसनोरनुकर्षणार्थो [3]न वक्तव्यः, एवं तर्हीयं प्राप्तिः पूर्वां प्राप्तिं बाधेत, तस्माच्च् चकारः स्यसनोर[4]नुकर्षणार्थः क्रियते । लुटि [5]च स्यसनोश्च क्लृपेः [6]परस्मैपदं वा भवति[7] । कल्प्ता, कल्प्तारौ, कल्प्तारः । [8]कल्प्स्यति । अकल्प्स्यत् । चिक्लृप्सति । कल्पिता। कल्पिष्यते। अकल्पिष्यत । चिकल्पिषते[9] ॥

इति श्रीजयादित्यविरचितायां काशिकायां वृत्तौ

प्रथमाध्यायस्य तृतीयः पादः ॥

———(०)———

1. क्लृपेः इत्यधिकम् अ.क.ह. 2. तु इत्यधिकम् क. 3. अनुकर्तव्यः क, क्रियते अ. 4. अनुकर्षणार्थं ब.अ. 5. च नास्ति फ. 6. धातोः इत्यधिकम् क.ह. 7. इति इत्यधिकम् अ. 8. कल्प्स्यति नास्ति क. 9. यत्र परस्मैपदं तत्र तासि च क्लृप इतीट्प्रतिषेधः । यत्र आत्मनेपदं तत्रेड् भवत्येव इत्यधिकम् अ.क.फ.